 ISSN 976-8645

# जैनधर्ममर्म तथा जैनग्रन्थरत्नानि

सुनील: के.एस[34],

विषयसारः - क्षमा , विनम्रप्रवृत्तिः , आर्जवम्, ब्रह्मचर्यम् , प्रमाण: ॥

सुविदितमेव सर्वेषामिदं यत्पुरा कदाचिदस्मिन्देशे बहवो जिनसम्प्रदायकप्रवर्तका: जैनाचार्या: गैर्वाण्यामनुपमं पाण्डित्यं संपाद्य अनेकानि सहृदयहृदयङ्गमानि काव्यान्यरचयन्निति । त इमे वेदप्रामाण्यस्थिरीकरण बद्धदीक्षै र्वादाहवेषु निर्जिता: प्रोत्साहकानां राज्ञामभावेन दुर्दशामापन्ना: कुत्रचित्कोणेषु विद्राविता: सरस्वतीमेव शरणं मन्वाना: श्रीमज्जैनयश:प्रख्यापकानि ग्रन्थरत्नानि ग्रथयन्त: स्याद्वादपरिपाटीं शास्त्रीयनयानुसारेण दृढयन्त: जिनसंप्रदायसरणिमवतीर्णानामन्येषां च आत्यन्तोपकारकानि सुभाषितान्यवशमुद्गृणन्त: सुखेन कालमनयन्निति च । विदांकुर्वन्तु सज्जना: सहृदया: जैनधर्ममर्मात्र सिंहावलोकनन्यायेन ।

**क्षमा :-** परकृतस्यापराधस्य सहनं , क्रोधोत्पादककारणेषु सत्स्वपि तदनुत्पादनं, उत्पन्ने च क्रोधे विवेकबलेन तस्य विफलं करणं क्षमा । श्रीमद्विराचार्यपूज्यपादैरुक्तम् -" दुष्टजनाक्रोशावज्ञाताडनशरीरव्यापादनादीनां सन्निधाने कालुष्यानुत्पत्ति: क्षमा" । अयमाशय: - महाव्रतिनो मुनयो अश्लील-परुष-निन्दावचनानि सहन्ते न किञ्चित् प्रतिवदन्ति,ते च परेषां विद्यमानान् दोषान् तन्निन्दार्थं न भाषन्ते । सतत च ते चेतनगुणान् धारयन्ति । अतो मुनय एव वस्तुत: क्षमाधर्मस्याराधका भवन्ति । अस्मादेव कारणात् जैनसिद्धान्तेषु उत्तमविशेषणैर्विशिष्टाः क्षमादयो दशापि धर्मा निगदिता । क्षमादीनां धर्माणामणुव्रतिनो ग्रहस्था धारका भवन्ति , ते दुष्टजनविहितमन्याय दुराचारं कदापि न सहन्ते, स्वसामर्थ्यात् तत् परिहारं कुर्वन्ति । एवञ्च दुष्टजनविरुद्धानि कार्याणि दृढतया आचरन्ति येन ते भविष्यत्काले तथा कर्तुमनागपि नोत्सहन्ते"।

**मार्दवम् :-" स्वमनसि मृदुताभावस्य सन्धारणं व्यवहारे च विनम्रप्रवृत्ते: सप्रयोगो मार्दवम्"** । जाति-कुल-रूप-ऐश्वर्य-विज्ञान-श्रुत-लाभ-बलैर्युतोऽपि तैः स्वमहत्वं न घोषयति गर्वमादधानश्च प्रमत्त: सन् न परान् पीडयति । उक्तम् "जात्यादिमदावेशादभिमानाभाषो मार्दवं माननिर्हरणमिति" सर्वार्थसिद्धौ ॥

**आर्जवम् :-"योगस्यावश्यकता आर्जवम्"** । काय-वचन-मन:क्रिया योगो भवति, विचार-भाषण-कायप्रयोगानां अनेकतायां आर्जवं जायते । कुटिलपरिणामानामेव परित्यागे आर्जवधर्म: संपद्यते ।

**शौचम् :- "प्रकर्षप्राप्तलोभान्निवृत्ति: शौचम्"** । सर्वापद्दायिनि परिग्रहे आसक्तिसिविरह:, धनधान्याद संग्रहवृत्तेरभाव शरीरेऽपि लोभसंवरणं शौचम् ॥

**सत्यम् - "सत्सु प्रशस्तेषु जनेषु साधुवचनं सत्यम्"** । सज्जनानां सुसंस्कृतानां मानवानां हितकरवचनं सत्यं ज्ञेयम् ॥

**संयम :- "प्राणीन्द्रियपरिहारस्संयम:"** । जगति यावन्त एकेन्द्रियादयो जीवास्तेषामपीडनं स्वेन्द्रियणां मनसश्च स्वाधीने करणे संयमो जायते ॥

---

[34] **श्रीभगवान महावीर जैन महाविद्यालय:,विश्वेश्वरपुरम्,बेङ्गळूरु**

**तपः -"कर्मक्षयार्थं तप्यत इति तपः"** । ज्ञानावरणादीनि कर्माष्टकानि जीवस्वभावघातकानि समस्तान् जीवान् संसारार्णवे पातयन्ति । कायक्लेषादिना तपसा जीवा भस्मसात् कुर्वन्ति तानि कर्माणि । कर्माणि विनाश्य मोक्षसुखमनुभवन्ति तपोधनाः ॥

**त्यागः -"संयतस्य योग्यं ज्ञानादिदानं त्याग:"** । सुपुत्रेभ्य आहारौषधज्ञानोपकरणपुस्तकादीनां भक्त्या प्रदान असहायानाथादिभ्यो दरिद्रेभ्यः कृपया भोजनवस्त्रादीनां वितरणं दानं ज्ञेयम् ॥ **आकिञ्चन्यम् - "उपात्तेष्वपि शरीरादिषु संस्कारापोहाय ममेदमित्यभिसन्धिनिवृत्ति: आकिञ्चन्यम्"** । कस्मिंश्चिदपि धनधान्यादौ बाह्यवस्तुनि रागद्वेषमोहादौ चान्तरङ्गपरिणतौ ममेदमित्यभिसन्धिराहित्यमाकिञ्चन्यम् ॥

**ब्रह्मचर्यम् - "स्वतंत्रवृत्तिनिवृत्त्यर्थो गुरुकुलावासो ब्रह्मचर्यम्"** । स्वदोषपरिहाराय, ज्ञानादिगुणानामभ्यासाय , गुरुपरतन्त्रतासेवनाय, आत्मदौर्बल्यत्रुटिहानाय च ब्रह्मणि=गुरुकुले, चर्यं=निवसनं ब्रह्मचर्यमिति निगद्यते ॥

एतैरात्मज्योतिरुद्भावकै: क्षमादिमहाधर्मैर्जगति "सत्यं शिवं सुन्दरं" इति महनीयं स्थानं लब्धुं शक्येत । एतेषां प्राकशपुञ्जे विस्तृते संसारे स्वार्थवशगतानां राष्ट्राणां पदवीलुब्धकानां, जननायकानां धर्मावरणे पातकं समाचरतां जनानां पारस्परिकं कलहादिकं विप्लुतं जायते ।

भारतीयप्रमाणशास्त्रे जैनदार्शनिकानां महत्वपूर्णं योगदानं वर्तते । प्रथमशतकात् प्रारभ्याष्टादशशताब्दीपर्यन्तं जैनदार्शनिकानामविच्छन्नपरम्परा दरीदृश्यते । तैः तैराचार्यैः ये सहस्राधिका: ग्रन्था: विरचिता: तेषां सामान्यसर्वेक्षणमपि न सुकरं किं पुन: तेषां विषयविवेचनम् एतेषु ग्रन्थेषु य: प्रमाणविचार: विद्यते तस्य परिशीलनेन ज्ञायते यत् जैनदर्शने प्रमाणविचार: कालक्रमेण विकासकोटीमाटीकते ।

जैनवाङ्मये प्राकृतागमानां महत्वपूर्णं स्थानम् । एतेषु प्रमाणचर्चा ज्ञानमीमांसेति कृता वर्तते । आचार्यपादै: उमास्वामिमहोदयै: तत्वार्थसूत्राख्ये ग्रन्थे तत्सर्वं साररूपेण निबद्धम् । तत: परमाचार्यसमन्त्रभद्रादारभ्य सिद्धसेन - दिवाकरभट्ट - कलंकदेव - विद्यानन्द - माणिक्यनन्दि-प्रभाचन्द्र-हेमचन्द्र-यशोविजयप्रभृतिभि: तेषु तेषु ग्रन्थेषु प्रमाणविचार: कृत: ।

**प्रमाणस्य फलम् :** प्रमाणस्यावगमनेन फलम् किमिति प्रतिपादितं माणिक्यनक्तिभि: -"अज्ञाननिवृत्तिर्हानोपेक्षाश्च फलम्" । य: प्रमिमीते स एव निवृत्ताज्ञानो जहात्यादत्त उपेक्षते चेति प्रतीते: ॥

**अष्टमीमांसा–न्यायावतार- सिद्धिविनिश्चय– प्रमाणसमुच्चय- अष्टसहस्री- प्रमाणपरीक्षा-सत्यशासनपरीक्षा -पत्रपरीक्षा- आप्तपरीक्षा – परीक्षामुखसूत्र –न्यायकुमुदचन्द्र - जैनतर्कभाषा-न्यायदीपिकाप्रभृतय:** जैन - प्रमाणशास्त्रस्य महनीया: ग्रन्था: । अत्र केवलं विदुषाम् परिशीलनार्थं प्रसिद्धग्रन्थान् परिचाययितुम् मोमुद्यते मे हृदयम् ॥

## ॥ प्रमाणनयतत्वालोकालङ्कार: ॥

तेषु ग्रन्थौऽयं प्राथमिकं रत्नं विलसति । रचयिता चास्य सुगृहीतनामा मुनिचन्द्रशिष्य: वादिप्रवरो देवसूरिरिति ज्ञायते । स हि क्रिस्त्वब्धानामेकादशे शतके समुत्पन्न: जयसिंहदेवनरपतेरास्थाने समाहृत: दिगम्बरचक्रवर्तिनं कुमुदाचन्द्राचार्यं चादाहवे निर्जित्य श्रीपत्तने दिगम्बराणां प्रवेशं न्यवारयदित्याद्युदन्त: पुरावृत्तेवेदिभिराख्यायते । ग्रन्थमिममधिकृत्य प्रस्तावनायां प्रकाशकैर्लिखिता वर्णावलिरिहानूद्यते सहृदयानुवाचकानामुपयोगाय -

 ISSN 976-8645

"अमुं ग्रन्थं सुगृहीतनाम्नो वादिप्रवरदेवसुरेर्मुखाम्भोजनिर्गलितामृतधाराऽऽसारमिव प्रमाणनयतत्वालोकालङ्कारं अदृष्टपूर्वं जैनमतमन्तव्यप्रमाणविचारकरं दुर्वादिवादवासना निर्यातनपरं विलक्षणभङ्गीकं सप्तभङीतरङ्गैतं निबन्धं निरीक्ष्य किमिदं कथमिदं कस्येदं कीदृशमिदमिति स्वभावेनैव जिज्ञासवः संपत्स्यन्ते तत्वग्रहाग्रहग्रहिलाः शास्त्रप्रियाप्रियाः । तदत्रावश्यकं किंचिनोपन्यस्तुम् । तत्र प्रथममवधेयं धीमद्धोरेयैस्तत्रभवद्भिः यत्कस्यापि मतस्य तत्वमनाकलय्य खण्डनमण्डनबद्धपरिकरा ये यथाजाताः शलभा इव परिपतन्ति ते लभन्ते न स्वात्मविनाशादृते किंचिदपि भावुकम् ।

न्यायशास्त्रस्यायमद्वितीयो ग्रन्थः सुरामः प्रमाणन्यादर्हभूतः , बहवो हि विषयाः समुपलभ्यन्तेऽत्र जैनशासनस्य , सन्ति चास्मिन्नष्टौ परिच्छेदाः प्रमाण - प्रत्यक्ष - स्मरणप्रत्यभिज्ञातर्कानुमान - आगमाख्यप्रमाण - विषय - फलप्रमाणस्वरूपाद्याभासनयात्मस्वरूप-वादिप्रतिवादिन्यायनिर्णय प्रतिपादकाः ॥ ग्रन्थस्यास्य श्रीदेवसूरिरेव रत्नाकरनाम्नीं महाव्याख्यां निर्ममे । तथाचोक्तम् -

**"स्याद्वादरत्नाकरतर्कवेधा मुदे न केषां न हि देवसूरिः"** इति ॥

## ॥ हैमलिङ्गानुशासनम् ॥

अथ श्रीहेमचन्द्राचार्यवर्यविरचितं लिङ्गानुशासनम् द्वितीयं रत्नं भवति । ग्रन्थेऽस्मिन् सप्तदशभिः श्लोकैः पुल्लिङ्गशब्दाः त्रयस्त्रिंशता पद्यानां स्त्रीलिङ्गाः , द्वाविंशच्छश्लोकैर्नपुंसकलिङ्गाः, द्वादशभिः, पुंस्त्रीलिङ्गाः , षड्विंशैः पुंनपुंसकलिङ्गाः , षड्भिः स्त्रीक्लीबलिङ्गाः , षड्भिः स्वतः स्त्रीलिङ्गाः , पञ्चभिः परलिङ्गाश्च समनुशिष्टाः अत्यन्तमुपकुर्वन्ति गैर्वाणीपठनाभिलाषिणाम् ।

अनन्तरमस्यां ग्रन्थमालायां सूत्ररूपेण लिखितं सिद्धहेमशब्दानुशासनं नाम स्वोपज्ञलघुवृत्तिसहितं धातुपाठादिभिरूपवर्द्धितं शब्दशास्त्रं तृतीयं रत्नं रसयति वशयति शाब्दिकान् । ग्रन्थमेतमधिकृत्य प्रकाशका एवं वदन्ति -- "इदं तदेवानुशासनं यस्य कृते बहवो विद्वांसश्चातकचेष्टामवलम्बमानास्तिष्ठन्ति । यतश्चैतदष्टानां व्याकरणामन्यतमरूपं कर्ता चास्य महार्णवन्यास बृहद्वृत्ति धातुपारायणप्रभृतिसपादलक्षपरिमित पञ्चाङ्गीव्याकरणनिर्माता श्रीकलिकालसर्वज्ञहेमचन्द्राचार्यवर्यः । तदिदं स्थूलतरसीसकाक्षरैएमुम्बापुरीसमुत्पन्नैर्मुद्रितं काश्यां प्रसिद्धे चन्द्रप्रभायन्त्रालये ।

ये पुरुषा आयासादुद्विग्ना व्याकरणबोधविरहितास्ते अवश्यमेव सन्तोषं लप्स्यन्तेऽस्य पठनेन न चास्ति कश्चित्सन्देहः , ग्रन्थकृतातीव सरला रीतिरापादिता यथा सर्वस्यापि सौकर्यमापद्येत ।

## ॥ जम्बूद्वीपसङ्ग्रहणी ॥

जम्बूद्वीपसङ्ग्रहणाभिध एकोनत्रिंशत्हायात्मको भूगोळिजज्ञासूनां श्रीहरिभद्रसूरिपादैः प्रतिपादितः । टीकाचास्य निष्टङ्किता सविस्तरा सरलभाषया श्रीप्रभानन्दसूरिभिर्नवत्युत्तरत्रयोदशशततमे विक्रमाब्धे । सङ्ग्रहण्यामस्यां सङ्गृहीताः सङ्ग्रहकारैर्जम्बूद्वीपस्यैवामुकामुकपदार्थाः सस्वरूपसङ्ख्याप्रमाणादयः । तत्र च वृत्ताकारस्थितासङ्ख्यद्वीपसमुद्राणां मध्यवर्तिनोऽस्यानेकशाश्वतवस्तुनिश्चित्य जम्बूद्वीपस्य द्वादशकेन कृता प्ररूपणा ॥

**उपसंहारः** - सन्त्यप्यनेके मतादिकमस्माकं भारते न कोऽप्यसङ्गतः , यतोह्येते तत्वार्थावगमनविषये कारका एव नतु मारकेति बौद्धादिदर्शनवदत्यन्तप्राचीनेदं जिनधर्ममत्र जिनान्तर्गत मुख्यप्राणप्रेरक भगवतः चरणनलिने समर्पयामि ॥

ISSN 976-8645

**॥ आकरग्रन्था: ॥**

१.जम्बूद्वीपसङ्ग्रहणी - श्रीजैनधर्मप्रसारकसभा,भावनगर ॥

२.हैमिलङ्गानुशासनम् -चन्द्रप्रभायन्त्रालयम् – काशी -१९०५

३.श्रीवादिदेवसूरिदेविरचित:-“प्रमाणनयतत्वलोकालङ्कार:”-निजधर्माभ्युदययन्त्रालयम् –वारणासी -१९५९

४.हरिभद्रविरचित : -षड्दर्शनसमुच्चय: -ऐश्याटिक् सोसैटि-कोलकत्ता

**********************